# राजा श्रृगालः

कस्मिंश्चित् वने कश्चन श्रृगालः वसति स्म । एकदा सः आहारम् अन्विष्यन् नगरं गतवान् । तं दृष्ट्वा अनेके शुनकाः भषन्तः समीपम् आगतवन्तः । श्रृगालः भीत्या धावितुम् उद्युक्तः । शुनकाः अपि तस्य अनुधावनं कृतवन्तः । सः प्राणभयेन मार्गे दृष्टं रजकगृहम् प्रविष्टवान् । तत्र नीलरसेन परिपूर्णम् एकं महाभाण्डम् आसीत् । सः तस्मिन् भाण्डे पतितवान् । यदा सः भाण्डात् बहिः आगतः तदा तस्य शरीरं समग्रं नीलवर्णमयम् आसीत् । एषः एव सः श्रृगालः इति अजानन्तः शुनकाः अन्यत्र गतवन्तः । श्रृगालः कथञ्चित् वनम् आगतवान् ।

तत्र अन्ये मृगाः तं नीलवर्णं श्रृगालं दृष्ट्वा भीताः पलायनं कुर्वन्ति स्म । तदा सः तान् उक्तवान् – 'भोः प्राणिनः भीतिः मास्तु । भवतां सर्वेषां रक्षणार्थम् एव वनदेवता मां प्रेषितवान् अस्ति । अतः इतः परम् अहमेव भवतां राजा । मम आज्ञा भवद्भिः पालनीया' इति । सर्वे अपि मृगाः तत् अङ्गीकृतवन्तः । एवं सः तस्य वनस्य राजा अभवत् । प्रतिदिनं सिंहादयः मृगान् मारयित्वा मांसम् तस्य पुरतः स्थापयन्ति स्म। चण्डरवः आनन्देन तत् खादन्ति स्म । एवमेव सः सुखेन जीवति स्म ।

एकदा श्रृगालः सभायाम् उपविष्टवान् आसीत् । अन्ये मृगाः अपि पार्श्वे आसन् । तदा अकस्मात् दूरप्रदेशातः श्रृगालसमूहस्य कोलाहलः श्रुतः । स्वबान्धवानां शब्दस्यः श्रवणात् तस्य महान् आनन्दः जातः । तस्य शरीरं पुलकितम् अभवत् । सः उत्थाय आनन्दातिरेकेण तारस्वरेण गातुं आरब्धवान् । तदा सींहादयः प्राणिनः 'एष सामान्यः श्रृगालः एव, न तु देवतया प्रेषितः' इति ज्ञातवन्तः । अतः एकेन एव प्रहारेण ते तं मारितवन्तः ।

* * *